O. P. JINDAL SCHOOL, SAVITRI NAGAR
SAMPLE QUESTION PAPER
Annual Examination (2022 – 2023)

Class / Section: VIII **MM: 80**
Subject: Sanskrit **Time: 3.00 Hrs.**
Name: _____ Roll No.:_____

(Fifteen Minutes Extra will be given for reading the Question Paper.)
General Instructions: ***All questions are compulsory***

निर्देशाः1) प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

खण्ड क	पठित अवबोधनम्	(10 अङ्काः)
खण्ड ख	रचनात्मकं कार्यम्	(15 अङ्काः)
खण्ड ग	अनुप्रयुक्तव्याकरणम्	(25 अङ्काः)
खण्ड घ	पठित–अवबोधनम्	(30 अङ्काः)

2) सर्वे प्रश्नाः अनिवार्याः।
3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
4) प्रश्नसंख्या अवश्यं लेखनीया।
5) उत्तराणि संस्कृतेन एव लेखनीयानि।

(खण्ड–क) पठित अवबोधनम्

प्र0 1 अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–

एकदा केचन शिष्याः भिक्षाटनं कुर्वन्ति स्म। तदैव एकः गजः महता वेगेन तस्मिन् मार्गे आगच्छत्। गजस्य उपरि उपविष्टः हस्तिपकः उच्चस्वरेण पुनः पुनः घोषयति स्म– अपसरन्तु इति। सर्वे शिष्याः धावितवन्तः यथा सर्वेषु वस्तुषु ईश्वरः अस्ति। तथा गजे अपि इति विचिन्त्य एकः शिष्यः तत्रैव स्थितवान्। तावति काले गजः तं स्वशुण्डया गृहीत्वा दूरे क्षिप्तवान्। शिष्यः मूर्छितम् तं गुरुकुलम् अनयन्। लब्धसंज्ञम् तं गुरुः अपृच्छत्–''वत्स ! त्वम् एवं किमर्थम् आचरः इति ?'' शिष्यः अवदत्–''गुरुवर्य ! भवद्भिः एव शिक्षितं यत् ईश्वरः सर्वेषु अस्ति। अतः अहम् गजे अपि ईश्वरं मत्वा तत्र अतिष्ठम् इति।'' गुरुः उक्तवान्– ''वत्स ! यथा गजे तथा हस्तिपके अपि ईश्वरः।'' इति कथम् न चिन्तितम् इति।

I एकपदेन उत्तरत – **(½x4=2)**

i गजः कं स्वशुण्डया गृहीत्वा प्रक्षिपत् ?
ii अपसरन्तु अपसरन्तु इति कः घोषयति स्म ?
iii ईश्वरः सर्वेषु अस्ति इति केन शिक्षितम् आसीत् ?
iv मूर्छितः कः अभवत् ?

II पूर्णवाक्येन उत्तरत– **(1x2=2)**

i शिष्यः कुत्र संज्ञाम् अलभत् ?
ii कस्मिन् ईश्वरम् विचिन्त्य शिष्यः तत्रैव स्थितवान्?

III प्रदत्त विकल्पेभ्यः उचितम् उत्तरम् चित्वा लिखत– **(1x4=4)**

i 'अपसरन्तु' इति क्रियापदस्य कर्तृपदम् किम् ?
(अ) गजाः **(ब)** हस्तिपकाः

(स) गुरुः **(द)** शिष्याः

ii 'हस्तिपके' इति पदे का विभक्ति अस्ति ?

(अ) प्रथमा **(ब)** द्वितीया

(स) सप्तमी **(द)** पंचमी

iii 'वेगेन' इति पदस्य विशेषण पदम् किं ?

(अ) मार्गे **(ब)** एकः

(स) महत् **(द)** तस्मिन्

iv 'तस्मिन् एव समये' इत्यर्थे अनुच्छेदे किम् पदं प्रयुक्तम् ?

(अ) पुनः **(ब)** तदैव

(स) तावति काले **(द)** तत्रैव

IV **कथायाः समुचितं शीर्षकं लिखत–** (कथा का उचित शीर्षक लिखिए।) **(2x1=2)**

(खण्ड–ख) रचनात्मकं कार्यम्

प्र0 2 नवमी कक्षायां प्रवेशं प्राप्तुम् प्रधानाचार्यम् प्रति पत्रं लिखत– **(½x10=5)**
(नवमीं कक्षा में प्रवेश पाने के लिए प्रधानाचार्य के प्रति लिखे गए पत्र को पूरा कीजिए)

तिथि–––––
माननीये (1) ––––––
राजकीय माध्यमिक विद्यालयः
वसंत कुंज नगरम्
नव देहली।
मान्य,
सविनयं निवेदनं अस्ति यत् अहं (2) ––––– इति कक्षायां 90%अंकान् (3)––––––– उत्तीर्णः जातः। ह्यः एव वयं वसंत कुंज इत्यस्मिन् नगरे स्वनिर्मिते (4) ––––– प्रवेशं कृतवन्तः। मम पूर्व विद्यालयः इतः एकविंशतिक्रोशः (5) ––––– दूरे अस्ति। अहं (6) ––––विद्यालये प्रवेष्टुम इच्छामि। (7)––––– विद्यालयस्य एकम् बसयानं अपि मम गृहस्य समीपे एव आगच्छति। (8) ––––– महयम अपि स्वीकृतिम् (9) ––––– भवन्तः अनुगृह्णन्तु।
सधन्यवादं
(10)––––––––
विनोदः

भवत्यां, गृहीत्वा, भवत्याः, प्रधानाचार्यमहोदया, पर्यन्तम्, कृपया, गृहे, आज्ञाकारी, दत्वा, अष्टम्

प्र03मंजूषायाम् प्रदत्त शब्दानाम् सहायतया चित्रं दृष्ट्वा पंच वाक्यानि संस्कृतेन लिखत– (1x5=5)

स्वास्थ्यम्, आवश्यकम्, कीटः, स्वच्छम्, जलम्, कीटनाशकम्, ओषधम्, गर्ते, हानिकारकः, ग्रामे, मलेरिया, कीटेन, प्रसन्नाः स्वस्था, स्वच्छे, कोरोनाः।

प्र0 4 हिन्दीभाषायाम् लिखितानाम् पंचवाक्यानाम् संस्कृतेन अनुवाद कुरुत– **(1x5=5)**

i चित्रकार चित्र बनाता है।

ii शेर वन में रहता है।

iii तुम कब खेलते हो ?

iv किसान खेत जाता है।

v हम दोनों बाज़ार जाते हैं।

(खण्ड–ग) अनुप्रयुक्तव्याकरणम्

प्र0 5 अधोलिखित वाक्येषु स्थूलपदानाम् समुचितं संधि–विच्छेदं वा प्रदत्त विकल्पेभ्यः चित्वा लिखत– **(1X5=5)**

i **विद्या + अर्थिनः** ध्यानेन पठन्ति।

(क) विद्यार्थिनः (ख) विद्यार्थी

(ग) विद्याअर्थी (घ) वीद्यार्थिनः

ii वसन्ते मन्दः मन्दः **पो + अनः** वहति।

(क) पोवन (ख) पोअनः

(ग) पवनः (घ) पनवः

iii **गुरुपदेशः** सर्वदा अनुकरणीया।

(क) गुरो + उपदेशः (ख) गुरौ + उपदेशः

(ग) गुरु + उपदेशः (घ) गुरू + ऊपदेशः

iv **चन्द्र + उदयः** निशायाम् भवति।

(क) चन्द्रादयः (ख) चन्द्रेदयः

(ग) चन्द्रौदयः (घ) चन्द्रोदयः

v सः **गायकः** नगरे वसति।

(क) गा + यकः (ख) गा + एकः

(ग) गै + अकः (घ) गे + अकः

प्र0 6 उचित रूपाणि चित्वा रिक्तस्थानानि पूरयत– (अशुद्धि शोधन) **(1x4=4)**

i एतत् गृहम् ———————— अस्ति।

(क) सुन्दरः (ख) सुन्दरम्

(ग) सुन्दरा (घ) सुन्दरे

ii उन्नतान् ———————— पश्य।

(क) पर्वतम् (ख) पर्वतानि

(ग) पर्वतान् (घ) पर्वतेन

iii त्वम् अत्र किं ———————— ?

(क) करोषि (ख) करोसि

(ग) करोशि (घ) करोति

iv ———————— बालिकाः नृत्यन्ति।

(क) चत्वारः (ख) चत्वारि

(ग) चतुर (घ) चतस्र

प्र0 7 उचितम् विकल्पम् चित्वा रिक्तस्थानानि पूरयत– **(1x4=4)**

i मुनिना ईशः ————————।

(क) स्मरति (ख) स्मर्यते

(ग) स्मरन्ति (घ) स्मर

ii लते भोजनम् ————————।

(क) खादतः (ख) खाद्यते

(ग) खादति (घ) खादन्ति

iii सैनिकेन दुष्टः ————————।

(क) जीयते (ख) जयति

(ग) जयते (घ) जय

iv सः पुस्तकानि ——————।

(क) पठति (ख) पठ्यन्ते

(ग) पठते (घ) पठन्ति

प्र0 8 अंकेन लिखितं समयं संस्कृतपदेन लिखित्वा रिक्तस्थानानि पूरयत– **(1x4=4)**

i नवीनः प्रातः 5:30 ———————— वादने उत्तिष्ठति।

ii सः 6:45 ———————— वादने विद्यालयम् गच्छति।

iii सः 2:00 ———————— वादने गृहम् प्रत्यागच्छति।

iv सः 6:15 ———————— वादने क्रीडति।

प्र0 9 प्रदत्त विकल्पेभ्यः उचितम् संख्यापदं चित्वा लिखत– **(1x4=4)**

i मम हस्ते ————————— फले स्तः।

(क) द्वि (ख) द्वौ

(ग) द्वे (घ) द्वयं

ii ————अश्वाः धावन्ति।

(क) चत्वारः (ख) चत्वारि

(ग) चतुर (घ) चतस्र

iii मम पार्श्वे ———— कन्दुकाः सन्ति।

(क) अष्टौ (ख) अष्टाः

(ग) अष्टम् (घ) अष्ट

iv विद्यालये ————————— सुयोग्यः प्राचार्यः अस्ति।

(क) एका (ख) एकः

(ग) एकम् (घ) एकेन

प्र0 10 प्रदत्त विकल्पेभ्यः उचितानि स्थूलप्रत्ययपदानि चित्वा लिखत– (1x4=4)

i **कम्पमानः** वानरः अगच्छत्।

(क) कम्प + मतुप् (ख) कम्प + शानच्

(ग) कम्प + ल्यप् (घ) कम्प + मानः

ii मया पत्रम् **पठनीयम्**।

(क) पठ् + तुमुन् (ख) पठ् + अनीयर्

(ग) पठ् + ल्यप् (घ) पठ् + ता

iii **दिन + ठक्** भास्करः समाचार पत्रम् अस्ति।

(क) दैनिकी (ख) दैनिका

(ग) दैनिक (घ) दिनइक

iv **गच्छन्** पुत्रः मातरम् पश्यति।

(क) गम् + णिनि (ख) गम् + शतृ

(ग) गच्छ् + अन् (घ) गच्छ् + तल्

(खण्ड–घ) पठित अवबोधनम्

प्र0 11 अधोलिखितम् अनुच्छेदम् पठित्वा तद् आधारितान् प्रश्नानाम् उत्तराणि लिखत–

पूर्व दिशायां उदेति सूर्यः पश्चिम दिशायां च अस्तं गच्छति इति दृश्यते हि लोके। परं न अनेन अवबोध्यमस्ति यत् सूर्यो गतिशीलः इति। सूर्य अचलः पृथ्वी च चला या स्वकीये अक्षे घूर्णति इति साम्प्रतम् सुस्थापितः सिद्धान्तः सिद्धान्तोऽयं प्राथम्येन येन प्रवर्तितः, सः आसीत् महान् गणितज्ञः ज्योतिर्विच्च आर्यभटः। पृथ्वी स्थिरा वर्तते इति परम्परया प्रचलिता रूढ़िः तेन प्रत्यदिष्टा। तेन उदाहृतम् यद गतिशीलायां नौकायां उपविष्टः मानवः नौकां स्थिरानुभवति, अन्यान्च पदार्थान गतिशीलान् अवगच्छति। एवमेव गतिशीलायां पृथिव्यां अवस्थितः मानवः पृथिवीम् स्थिरानुभवति सूर्यादिग्रहान च गतिशीलान् वेत्ति।

I एक पदेन उत्तरत– (1x2=2)

i सूर्यः कस्याम् दिशायाम् अस्तं गच्छति ?

ii कः अचलः ?

II पूर्णवाक्येन उत्तरत– (2x1=2)

i नौकायाम् उपविष्ट मानवः किं अनुभवति?

III उचितम् उत्तरम् चित्वा लिखत– **(1x2=2)**

i 'परकीयम्' इत्यस्य किं विलोमपदं अनुच्छेदे प्रयुक्तम् ?

(अ) साम्प्रतम् (ब) स्वकीयम्

(स) प्रचलित (द) पृथिवी

ii 'नौकायाम् इति पदे का विभक्ति ?

(अ) षष्ठी (ब) पंचमी

(स) सप्तमी (द) द्वितीया

प्र0 12 अधोलिखितम् श्लोकम् पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत–

अनेक गंधप्रवहम् पुण्य गंधम् मनोहरम्।
शैलेन्द्रमिव गंधाढ्यम् द्वितीयं गंधमादनम्।

I एकपदेन उत्तरत– **(1x2=2)**

i अनेक किम् प्रवहम् ?

ii किम् मनोहरम् ?

II पूर्णवाक्येन उत्तरत– **(2x1=2)**

i गंधाढ्यम् कथमिव भवति ?

III उचितम् उत्तरम् चित्वा लिखत– **(1x2=2)**

i 'मनोहरम्' इति क्रियापदस्य कर्तृपदम् किम् ?

(अ) पुण्यगंधम् (ब) गंधप्रवहम्

(स) गंधाढ्यम् (द) गंधमादनम्

ii 'पर्वतराज' इत्यर्थे श्लोके किम् पदम् प्रयुक्तम् ?

(अ) प्रवहम् (ब) शैलेन्द्र

(स) अनेक (द) द्वितीय

प्र0 13 अधोलिखितम् नाट्यांशम् पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत–

कचनार् कुत्र उपविशामः ?

रिपंची अस्मिन् काष्ठपीठे उपविशामः। (सर्वाः उपविशन्ति) अपि पश्यथ, वयं यत्रोपविष्टाः तत्र कानि वस्तूनि सन्ति ?

परमिन्दर् आम् आम् ! बहूनि वस्तूनि परितो विकीर्णानि।

कचनार् यथा स्यूतः, जलकूपी, कन्दुकम् इत्यादीनि।

रोजलिन् हला, आत्मानम् अपि पश्य।

चेनम्मा आम् आम्! पश्यामि एव मम सविधे कङ्कतम, कुण्डलम्, केशबन्धः घटिपट्टिका, कङ्कणम् इत्यादीनि सर्वाणिविराजन्ते। किमसि वक्तुकामा ?

रिपंची इदं ध्यातव्यं यद् एतानि सर्वाणि वस्तूनि प्रायः प्लास्टिकेन निर्मितानि सन्ति।

I एकपदेन उत्तरत– **(1x2=2)**

i परितो कानि विकीर्णानि सन्ति ?

ii का कथयति आत्मानं अपि पश्य ?

II पूर्णवाक्येन उत्तरत– **(2x1=2)**

i चेनम्मायाः सविधे कानि वस्तूनि आसन् ?

III उचितम् उत्तरम् चित्वा लिखत– **(1x2=2)**

i किम् इदं प्लास्टिकेन न निर्मितम् अस्ति ?

(अ) जलकूपी (ब) काष्ठपीठे

(स) कङ्कतम् (द) कन्दुकम्

ii 'सर्वतः' इत्यर्थे संवादे किम् शब्दम् प्रयुक्तम् ?

(अ) सविधः (ब) परितः

(स) स्यूतः (द) हला

प्र0 14 अधोलिखितेषु वाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत– **(1x4=4)**

i हिमालयः<u>उत्तरस्यां</u> दिशि वर्तते।

(अ) कस्याम् (ब) काम्

(स) केन (द) काभ्याम्

ii कुमारसंभवम् <u>कालिदासेन</u> विरचितम्।

(अ) काम् (ब) का

(स) कुत्र (द) केन

iii <u>सावित्र्याः</u>मृत्युःअसाध्यरोगेण अभवत् ।

(अ) केभ्यः (ब) कस्याः

(स) किम् (द) कस्य

iv कस्तूरी <u>मृगात्</u> जायते।

(अ) किम् (ब) कस्मात्

(स) कस्मिन् (द) कया

प्र0 15 उदाहरणानुसारं क्रियापदपरिचयं लिखत– **(1x4=4)**

	पदानि	**धातु**	**लकार**	**पुरुषः**	**वचनम्**
उदा0	सन्ति	अस्	लट्लकारः	प्रथम पुरुषः	बहुवचनम्
i	कूर्मः	————	———	———	———
ii	पश्य	————	———	———	———
iii	आगच्छ	————	———	———	———
iv	प्रचलिष्यति	————	———	———	———

प्र0 16 अधोलिखितानि पदानि आधृत्य वाक्यानि रचयत– **(1x4=4)**

(निम्नलिखित पदों के आधार पर वाक्य बनाइए–)

स्वकीयम्, हिमालये, सविनोदम्, कर्मभूमिः

———00———